# सांख्यदर्शनम्

**वसुंदा एम.**

मानवजीवने सत्यासत्य–श्रेयप्रेय–निश्रेयसाभ्युदय–प्रियाप्रिय–चेतनाचेतन– सुखदुःखादि–तत्त्वानां रहस्यं किमिति ज्ञातुं सृष्टिकालादारभ्य भारतीय–ऋषीश्वराः प्रयतितवन्तः। एतत्तु वेदकालादारभ्य आधुनिककाल–पर्यन्तवैदिकलौकिकसाहित्यावलोकनेन स्पष्टो भवेत्। अतः भारतवर्षे वेदकालादारभ्य विविधचिन्तापद्धतिः आसीदित्यवगन्तुं शक्यते। प्रापञ्चिक–रहस्यान्वेषणतत्पराः ते ऋषयः तेषां चिरकाल–प्रयत्नस्य फलरूपं यत् ज्ञानं तत् क्रोटीकृत्य स्वशिष्यान् पाठितवन्तः। एते एव वेदेतिहासपुराण–दर्शनादिनाम्ना प्रसिद्धाः। ते च आस्तिक–नास्तिक, सेश्वर–निरीश्वर, आध्यात्मिक–भोतिकादिरूपेण बहुधा सन्ति। प्रायः ते आत्यन्तिकदुःख–निवृत्त्युपायाः व्युत्पत्तिपरकान्येव भवन्ति। अत एव आधुनिककाले अपि तेषां प्रसक्तिः अन्यूना एव।

दृशिर् प्रेक्षणे इति धातोः करणार्थे ल्युट् प्रत्ययेन निष्पन्नः दर्शनशब्दस्यार्थः सत्यार्थज्ञानमित्येव। दुःखसंश्लेषविद्वेषिसुखास्वादनतत्पराः मानव आत्यन्तिकसुखलाभार्थं नानाप्रकारान् उपायान् समाश्रयन्ति। ते च कर्म ज्ञानं ज्ञान–कर्मसमुच्चयात्मकाः च भवन्ति। यद्यपि स्रक्चन्दनवनितादयः लौकिकसुखलाभोपायाः लोके प्रसिद्धाः, ते क्षणिकत्वात् त्याज्याः तथापि आत्यन्तिक–सुखोपायव्युत्पत्तिः शास्त्रादिभ्य एव लभ्यते। तदर्थं वेदानां उपनिषदां दर्शनानां तथा शास्त्राणां च विधिवत् अध्ययनं कार्यम्। ततो ज्ञानप्राप्तिः भविष्यति। आत्यन्तिकसुखं तु ज्ञानादेव भवेत। उक्तञ्च आत्मा वा अरे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। इति (बृ.उ.–4–5–6) प्रायः एतत् बृहदारण्यकश्रुतिवाक्यमेव पश्चात्कालीनात्मदर्शनगवेषकाणां उत्तरोत्तरविचिन्तनाय प्रेरकत्वेन अभूत्। उपनिषत्प्रतिपादिततत्त्वानां लक्षणोदाहरण–प्रदर्शनपुरस्सरं पश्चादागमिष्यमाणानां आपत्तीनां परिहारपूर्वकं च शास्त्राणि ग्रथितानि। अत एव तानि प्रामाणिकानि प्रवृत्त्युपायव्युत्पत्तिदायकानि चेत्युच्यन्ते।

भारतीयदर्शनानि तावत् आस्तिक–नास्तिक–भेदेन द्विधा। तत्र यानि श्रुतिप्रामाण्यमङ्गीकुर्वन्ति तानि आस्तिकानि, यानि पुनः तन्नाङ्गीकुर्वन्ति तानि नास्तिकानि च इति शास्त्रसमयः। सांख्ययोगन्यायवैशेषिकपूर्व–

मीमांसोत्तरमीमांसाः षट्दर्शनानि। नास्तिकास्तु चार्वाकजैनबौद्धादय एव। समेषां दर्शनानां मुख्योद्देश्यस्तु आत्यन्तिकदुःखनिवृत्तिरूपः मोक्ष एव। शास्त्रद्रष्टारः ऋषीश्वराः चिरकालतपस्वाध्यायनिरीक्षणपरीक्षणादिकं कृत्वा स्वानुभवसंपत्त्यनुसारम् एव स्वमतस्थापनं कृतवन्तः। अत एवं लोककल्याणकारकत्वेन चिरप्रतिष्ठामलभत। यद्यपि एतानि अद्वैतात्मतत्त्व–प्रतिपादकेन मोक्षोपायव्युत्पत्तिप्रदायकानि, तथापि आचार्यवर्याणां चिन्तामार्गस्य भेदात् दर्शनानामपि विभिन्नत्वं वर्तते। नानात्वे अपि एतानि ज्ञानाभिवृद्धिहेतुत्वात् सूत्रग्रथित रत्नानि इव परस्परं संबद्धान्येव। दर्शनेषु मध्ये सांख्यदर्शनमेव प्रथमगणनीयमिति हेतुत्वात् तदेव संक्षेपेण निरूप्यते।

सांख्यदर्शनस्य प्रवर्तकः भगवान् कपिलमुनिः अस्ति। अधुना तस्य सूत्रग्रन्थः नोपलभ्यते, तथापि उपलभ्यमान–सामग्रीसाहाय्येन विषयपूर्तिं कर्तुं अयं यत्नः। सांख्यशब्दस्य नानार्थवाचित्वात् सांख्यशब्दस्य अर्थः विचार्यते। सांख्यशब्दः संख्यासम्बन्धात् निष्पन्नो भवतीत्यमरकोशे यथा –

**संख्या चर्चा विचारणा। (अ.को. 1–4–2)**

तत्रैव अन्यत्र यथा –

**संख्यावान् पण्डितः कविः। (अ.को. 2–7–5)**

तट्टीकायां भट्टक्षीरस्वामी यथा – सम्यक् ख्यानं ज्ञानमस्त्यस्य संख्यावान् संख्या विचारणा वा। इति।

अन्ये तु चक्षिङ्ख्याञ् धातो अण् प्रत्ययेन निष्पन्न सांख्यशब्दस्यार्थः सम्यक् ख्यानम् अथवा सम्यक् विचार इति। सांख्यमतानुसारं तस्यार्थस्तु ज्ञानम् अथवा विवेकख्याति इत्येव। यतोहि आजन्मतो आत्मा पुरुष एव भवति, तथापि अज्ञानावृतत्वात् तस्य वास्तविकं रूपं ज्ञातुं न शक्यते। अज्ञाननिवृत्तिस्तु ज्ञान–सम्पादनद्वारा एव भविष्यति। एतत्तु सांख्यदर्शने मुनिना कपिलेन सम्यक् निरूपितमस्ति। अतः सांख्यशब्दस्यार्थः तत्रोक्तपञ्चविंशतितत्त्वानां संख्यातः निष्पन्नं इति वक्तुमुचितम्। सांख्यदर्शनं पश्चात्काले विश्वदर्शनत्वेन सर्वैरङ्गीकृतम्। इतिहासपुराणादौ दर्शनान्तरेषु च तस्य आदरसूचकोल्लेखानि वर्तन्ते। यथा श्रीमद्भागवतपुराणे –

**प्रसंख्यानाय तत्त्वानां समन्तादात्मदर्शने इति।**

**(श्री.भा. पु. – 3–24–2)**

मत्स्यपुराणे यथा –

**सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते इति।**

**(म.पु.)**

उक्तं च चरकसंहितायां यथा –

**सांख्यैः संख्येययौः इति। (च.सं.)**

आस्तिकदर्शनेषु प्रथमगणनीयत्वेन विराजमान–सांख्यदर्शनस्य श्रुतिमूलकत्वं संग्रहेणात्र प्रदर्श्यते। ऋग्वेदस्य दशमे मण्डले नासदीयसूक्ते तमसः कार्योल्लेखनसामर्थ्यं अस्तीति उपवर्णितमस्ति। यथा –

**तम आसीत्तमसा गुळ्हमग्रे अप्रकेतम् इति।**

**(ऋ.सं. 10–129–3)**

तत्भाष्ये भाष्यकारेण सायणाचार्येण एवमुक्तं यत् एतदेव सत्कार्यवादसिद्धान्तस्य मूलं स्यात् इति। तत्रैव सूक्तान्तरे सांख्यशास्त्र–प्रसिद्धस्य प्रधानस्य निर्देश उपलभ्यते यथा –

**तमिद्गर्भं प्रथमं दघ्र आपो यत्रे देवाः समगच्छन्त विशवे।**
**अजस्य नामवध्येकमपि तं सास्मिन् विश्वानि भुवनानि तस्थुः।।**

**(ऋ.सं. 10–82–3)**

बृहदारण्यकोपनिषदि सांख्यपुरुषसमानतत्त्वस्य निर्देश एवं उपलभ्यते। यथा – स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्टैव पुण्यं च पापं च। पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यस्तत्र किञ्चित् पश्यत्यनेनिवागतस्तेन भवत्यसङ्गो ह्ययं पुरुषम् इत्येवमेवैतद् याज्ञवल्क्यः स अहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति। (बृ. उ.–4–3–15)

तत्रैव अन्यत्र महत् शब्दस्य निर्देशो यथा –

**इदं महद्भूतमनन्तमपारं विज्ञानघन एव। इति**

**(बृ.उ.–2–4–12)**

छान्दोग्योपनिषदि सत्कार्यवादस्य बीजरूपतत्त्वस्य निर्देशो यथा –

**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। इति**

**(छा.उ. – 6–2–1)**

त्रिगुणानामुल्लेखो यथा –

**यदग्ने रोहित ँ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्विम्। (छा.उ. –6–4–1)**

श्वेताश्वेतरोपनिषदि सांख्यदर्शनस्य साक्षात्निर्देश उपलभ्यते। यथा–

**तत्कारणं सांख्ययोगाधिगम्यम्। इति**

**(श्वेता.उ.–6–13)**

एवं श्वेताश्वेतरोपनिषदि अजप्रधानादि– शब्दा अपि उपलभ्यन्ते। अतः सांख्यदर्शनस्य श्रुतिमूलत्वं सिद्धम्। महाभारते विशिष्य भगवद्गीतायां च अस्य दर्शनस्य परामर्शाः बहुत्र उपलभ्यन्ते। भगवद्गीतायां यथा –

**अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।**
**गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।।**

**(श्री.भ.गी–10–26)**

सांख्यदर्शनस्य प्रामाणिकग्रन्थत्वेन आचार्येण ईश्वरकृष्णेन विरचिता साख्यकारिका नाम एक एव ग्रन्थ अधुना उपलभ्यते। यद्यपि कपिलसूत्र–मिति कश्चन ग्रन्थ उपलभ्यते, तथापि विपश्चितानां मध्ये तत्कर्तृत्वविषये मतभेददर्शनात् तदत्र न उच्यते। अतः सांख्यकारिकानुसारमेवात्र विषयविवेचनं करिष्यामि।

आचार्येश्वरकृष्णविरचितसांख्यकारिकायां सप्ततिः कारिकाः सन्ति। ग्रन्थ अयं विशालकायः षष्टितन्त्राख्यग्रन्थस्य संक्षेपरूप एव इति ग्रन्थान्ते अनेन प्रदर्शितमस्ति। यथा –

**सप्तत्यां किल येऽर्थास्ते अर्थाः कृत्स्नस्य षष्टितन्त्रस्य। इति**

**(सां.का – 72)**

अनेन सांख्यकारिकायां सप्ततिकारिकाः सन्ति इत्यवगम्यते। तत्र सांख्यशास्त्रसंबन्धीनि अखिलानि तत्त्वानि ग्रन्थकृता सम्यक् निरूपितानि। अत एव तद्भाष्यकारेण आचार्यवाचस्पतिमिश्रेण एवं निर्णीतं भवेत्। यथा–

**सेयं षष्टि पदार्थः कथितेति सकलशास्त्रकथनान्नेदं प्रकरणमपि तु शास्त्रमेवेदमिति सिद्धम्।** (सां.–त. कौ–पुट–197)

सांख्यकारिकायां प्रतिपादितानां प्रमुखविषयाणां परीक्षा एव अत्र संग्रहेण क्रियते। ते च प्रमाण–सत्कार्यवाद–गुणत्रय–प्रकृति–पुरुष–सृष्टि–प्रलय–कैवल्यादयः भवति।

लोके परिदृश्यमानानां आधिभौतिक–आधिदैविक–आध्यात्मिकरूपाणां त्रिविधानां सन्तापानां विनाशः प्रायः कर्ममार्गेण शक्यते, परन्तु तत्र अविशुद्धिक्षयातिशय–युक्तत्वात् तन्न श्रेयान्। तद्विपरीतः व्यक्ताव्यक्तज्ञा–विज्ञानरूप ज्ञानमार्गः निर्दुष्टत्वात् तदेव मोक्षोपायः श्रेष्ठः इति कपिलादीनां

आदेशः। कर्ममार्गे पशुहिंसायाः सत्त्वात् ततो आविशुद्धिः क्षीणेपुण्ये मर्त्यलोकं विशन्ति इत्यादिना क्षयशालित्वं, तथा अर्थवाद–बहुलत्वात् अतिशयोक्तिः च विद्यते। ज्ञानमार्गे तु केवलं पञ्चविंशतितत्त्वानां विमर्शनेन आत्यन्तिकदुःखनिवृत्तिरूप कैवल्यावाप्तिः भवेत्। प्रमेयावगमः प्रमाणाधीनत्वात् आदौ प्रमाणानि निरूप्यते। उक्तं च ग्रन्थकृतापि यथा –

**प्रमेयसिद्धिः प्रमाणाद्धि। इति (सां.का. 4)**

सांख्यदर्शने प्रत्यक्षानुमानमाप्तवचनं चेति त्रीणि प्रमाणानि सन्ति। यथा –

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं। इति**

(सां.का 3)

प्रमीयते अनेन इति प्रमाणम्। उक्तं च तत्त्वकौमुद्यां यथा –

**प्रमीयते अनेनेति निर्वचनात् प्रमां प्रति करणत्वमवगम्यते। तच्च असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः। बोधश्च पौरुषेयः फलं प्रमा। तत्साधनं प्रमाणम्।**

**(सां. तत्त्व. कौ– पुट – 22)**

तत्र प्रत्यक्षलक्षणं यथा –

**प्रतिविषयाध्यवसायो दृष्टम्। इति (सां. का – 5)**

एभिः प्रमाणैः ज्ञानावाप्तिप्रकारस्तु यथा –

**सामान्यतस्तु दृष्टात् अतीन्द्रियाणां प्रतीतरनुमानात्।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम्।।**

**(सां.का – 6)**

अर्थात् पञ्चेन्द्रियगोचरपदार्थानां ज्ञानं प्रत्यक्षेण भविष्यति। अतीन्द्रियपदार्थानां प्रतीतिः तु सामान्यतोदृष्टानुमानेन भवेत्। ततः अपि असिद्धपदार्थानां प्रतीति आप्तागमादेव भवेत्। अतिदूरसामीप्यादि कारणवशाद् समीपवर्तिन्यपि पदार्थानां प्रतीतिः कदाचित् न भवति। अतः प्रत्यक्षातिरिक्तप्रमाणान्यपि स्वीकृतानि अत्र।

असदेवेदमग्रे आसीत् – (छां. उ.–6–2–1) इति छान्दोग्यश्रुत्यनुसारं परिदृश्यमानप्रपञ्च असत्कारणात् संभूतमिति केचन वदन्ति। तेषां मतं निराकर्तुं सत्कार्यवादः निरूपितः।

सदेवसौम्येदमग्रे आसीत् – (छा.उ.–6–2–1) इतिछान्दोग्यश्रुत्यनुसारं सदः एव सद्जायते, पुनः असदः किमपि न जायते इति दर्शनात् श्रुतिचोदितः सत्कार्यवाद एव कपिलेन स्वीकृतः। यथा –

**असत्करणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।**
**(सां.का.–9)**

नियतपूर्ववर्तिकारणादेव कार्योत्पत्तेः दर्शनात् सत्प्रपञ्चरूपकार्यं असत्कारणात् नैव भवितुं युक्तम्। लोके असतो सदुत्पत्तिः न द्रष्टुं शक्यते। अतः कार्यं सत् कारणत्वात् घटवत् इत्यनुमानेन सत्कार्यम्। कार्यनियतपूर्ववर्तिकारणादेव कार्यव्यापारात्पूर्वं कारणव्यापार–अवश्यं भवितव्यम्। यदि उपादानकारणं नाङ्गीकुर्वन्ति ततो न कार्योत्पत्ति प्रसङ्गः भवेत्। यथा – घटं प्रति मृत्। मृदभावे घटोत्पत्तिवत्। अत– प्रपञ्चरूपकार्यं प्रति उपादानकारणत्वेन पुरुषः कल्पनीयाः। लोके यत्र कुत्रापि कारणासमबद्धं कार्यं न दृश्यते। यदि चेत् मृतो पटोत्पत्तिः सिकताद् तैलोत्पत्तिः च भवेत्। सर्वसम्भवः एकस्मादेव कारणात् भवेत्। तत्तु नास्ति खलु। अतः सर्वसम्भवाभावात् सत्कार्यम्। असत्वे नास्ति सम्बन्धः कारणे सत्त्वसंगतिः इत्यादिना (सां.तत्त्व.कौ–पृ–54) अयमेव विषयः उक्तः। यस्मिन् कारणे कार्योत्पत्तिशक्तिरस्ति तत्रैव कार्योत्पत्तिः भविष्यति। सत्कारणात् सत्कार्यस्योत्पत्तिः जायते। न तु असतः। एवं कारणविशेषात् कार्यविशेषः। अन्यथा अव्यवस्था स्यात्। अत एव उक्तं शक्यस्य शक्यकरणात् सत्कार्यमिति। कारणाभावात्सत्कार्यम् तु यदि कारणमसत् ततोत्पन्नं कार्यमपि असदेव भवितुमर्हति। यथा पटं प्रति तन्तुरेव कारणं, असत्तन्तुतः सत्पटरूपकार्योत्पत्तिः नैव भविष्यति। तन्तुरेव खलु पटरूपेणपरिणतः, तन्तुभिन्नपटः लोके न दृश्यते। अतः कारणाभिन्नम् कार्यरूपं एव। तस्मात् असत्कारणात् सत्कार्यस्योत्पत्तिः नास्ति। अतएवोक्तं कारणाभावात् सत्कार्यमिति। एभिः पञ्चहेतुभिः सत्कार्यस्य सिद्धिरत्रप्रदर्शिता। सांख्यशास्त्रे उक्तपञ्चविंशतिपदार्थाः यथायथमत्र प्रदर्श्यन्ते।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। (सां.का. –3)**

मूलप्रकृतिः, महत्तत्त्वं, अहंकारः, शब्दस्पर्शरूपरसगन्धाख्यपञ्च–तन्मात्राः, ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं, पञ्च– महाभूतानि तथा पुरुषश्चेति पञ्चविंशतितत्त्वानि। तत्र मूलप्रकृतिः अविकृतिः अर्थात्

कारणरूप एव। महदादयो सप्त प्रकृतिविकृति स्वरूपाः, कारणरूपा कार्यरूपाश्च भवति। शब्दस्पर्शाद्यारभ्यपञ्चमहाभूतपर्यन्ताः षोडशपदार्थाः केवलविकृतिरूपाः अर्थात् कार्यरूपाः एव। न प्रकृति न विकृतिः पुरुषः, पुरुषः न वा कारणरूपः न कार्यरूपश्चेत्यर्थः। एतेषां पञ्चविंशतितत्त्वानां विशेषज्ञानात् कैवल्यसिद्धिः भवेत्। प्रकृतेरस्तित्वविषये भेदानां परिणामात्, समन्वयात्, शक्तितः प्रवृत्तेः, कारणकार्यविभागात् अविभागात् विश्व रूपस्येति च पञ्च हेतुप्रदर्शनपुरस्सरं सिद्धान्तितमस्ति। (सां.का–10–11) तदनन्तरं व्यक्ताव्यक्तयोः प्रकृतिपुरुषयोश्च साधर्म्यवैधर्म्यान् प्रदर्श्य गुणत्रयविभागः सलक्षणं निरूपितः ग्रन्थकृता। गुणलक्षणं यथा –

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।**

**(सां. का.–12)**

तत्र प्रीतिः सुखं प्रीत्यात्मकःसत्त्वगुणः, अप्रीति दुःखं तदात्मको रजोगुणः, विषादो मोहः विषादात्मको तमोगुणश्चेत्यर्थः। एते सत्त्वादीनां धर्माः यथाक्रमं प्रकाशप्रवृत्तिनियमाश्च भवन्ति। तेषामन्योन्याश्रयवृत्तित्वं तु सत्त्वप्रधाने प्रवृत्तिनियमानाश्रित्यरजस्तमसौ प्रकाशमुपकरोति। एवं रजःप्रकाशनियमानाश्रित्यसत्त्वतमसौ तथा तमःप्रकाशनियमानाश्रित्य–सत्त्वरजसौ च आश्रयाश्रयीभावः वर्तते। उक्तं च श्रीमद्भगवद्गीतायां यथा–

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत।**
**रजः सत्त्वं तमश्चेव तमः सत्त्वं रजस्तथा।।**

**(श्री.भ.गी. – 14–10)**

सत्वादिगुणानां अन्योन्यजननवृत्तित्वं तथा अन्योन्यमिथुनवृत्तित्वं च अस्ति। सत्त्वादीनां विशेषलक्षणं यथा –

**सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः।।**

**(सां.का. –13)**

तत्पश्चात् पुरुषस्यास्तित्वबहुत्वादिकं च निरूप्य सृष्टिक्रम उक्तः। तत्तु यथा –

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।**

**(सां.का.–21)**

एवं प्रकृतिपुरुषयोः संयोगात् सर्ग इति प्रदर्शयित्वा तदनु कैवल्यस्वरूपं च विस्तरेणनिरूपितमस्ति। (सां.का.–50–60) कैवल्यप्राप्त्यनन्तरमपि पुनः सृष्टिः कुतो न जायते इति चेदाह –

**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।**
**या दृष्टा अस्मीति पुनर्न दर्शनमुपैति पुरुषस्य।।**
**(सां. का.–61)**

एवं प्रकृतिपुरुषयोः परस्परं नास्मि न मे नाहमिति तत्त्वाभ्यासात् कैवल्यसिद्धिः भवेत्। प्रारब्धकर्मवशात् देहपातपर्यन्तं अत्र उषित्वा अन्ते ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति। (सां.का.–64)

*प्रवाचकः*
*एस.एस.यू.एस.आर.इ. कोयीलेण्डी,*
*नाडूवत्त्रम् (पीओ)*
*कोयीलेण्डी (विले.)*
*कालीकटजिल्लः, केरलः*

**<u>सहायकग्रन्थसूची–</u>**

1. बृहदारण्यकोपनिषद्, 2. अमरकोशम्,
3. अमरकोशटीका, 4. श्रीभागवतमहापुराणम्,
5. मत्स्यमहापुराणम्, 6. चरकसंहिता,
7. ऋग्वेदसंहिता, 8. छान्दोग्योपनिषद्,
9. श्वेताश्वेतरोपनिषद्, 10. श्रीमद्भगवतगीता,
11. सांख्यकारिका, 12. सांख्यतत्त्वकौमुदी।।

–––000–––